**अजय** पु० वीरभूमिनगरसन्निधाने (अजय) इति नामके नदविशेषे इति कल्पद्रुमः। तन्मूलं मृग्यं संस्कृतशास्त्रे तन्नदस्य कुत्राप्यनुल्लेखात्। अजेन छागेन याति या-क ३त०। छागवाहने अग्नौ पु०। जि-अच् न०त०। जयाभावे "लाभालाभौ जयाजयाविति" गीता। ब०। जयशून्ये त्रि०। अश्ययी०। जयाभावे अव्य०। नास्ति जयो मादकत्वेनास्याम्। (सिद्धि, भाङ्ग) इति च प्रसिद्धनामिकायाम् विजयायाम् स्त्री।

**अजय्य** त्रि० जि-शक्यार्थे यत् न०त०। जेतुमशक्ये दुर्जये शत्रौ पणे च। "दैवैरजय्यान् दितिजान् विजिग्ये" इति भार०। "तत्राजय्यं जिगाय तान्" इति मुग्ध०।

**अजरा** त्रि० नास्ति जराऽस्याः। (घृतकुमारी) इति प्रसिद्धे वृक्षे तस्य जराभावात्तत्त्वम्। अव्ययीभावे अच् समा०अजरसम् जराभावे अव्य०। नास्ति जरा यस्य, देवे। तेषां षड्भावविकारमध्ये जायतेऽस्ति वर्द्धते इति तिसृणामेव दशानां सद्भावात् तदुत्तरवर्त्तिनीनां "विपरिणमते अपक्षीयते नश्यतीति" तिसृणामभावादजरत्वम्। जराशून्ये त्रि०। "अजरामरवत् प्राज्ञो विद्यामर्थांश्च चिन्तयेदिति" नीति०। ब्राह्मणजातौ स्त्री। "सा सत्या साऽजरामरेति पुरा०। न जीर्य्यति क्षीयते जॄ-अच् न० त०। परब्रह्मणि न०। वृद्धदारकनामवृक्षभेदे पु०। गृहगोधिकायाम् स्त्री।

**अजर्य्य** न० न जीर्य्यति न+जॄ-कर्त्तरि यत्। सौहार्द्दे "तेन सङ्गतमर्य्येण रामाजर्य्यं कुरु द्रुतमिति" भट्टिः।

**अजलम्बन** न०अज इव लम्ब्यते गृह्यते कृष्णवर्णत्वात् कर्म्मणि ल्युट्। स्रोतोऽञ्जने।

**अजलोमन्** पु० अजस्य लोमेव लोम (मञ्जरी) यस्य ब०। (शूकशिम्बी) इति ख्याते अजलोमवन्मञ्जरीविशिष्टे वृक्षभेदे। वा डाप् वा ङीप् च। अजलोमा-अजलोमी चेत्यप्यत्र स्त्री। [जविनीभिर्विदृस्वन्" इति वेदः।

**अजवस्** पु० जु-असुन् न०त०। वेगशून्ये। "अजवसो

**अजवस्ति** स्त्री अजस्य बस्तिरिव वस्तिरस्य। ऋषिभेदे। गृष्ट्या० अपत्यार्थे ढञ्। आजवस्तेयः तदपत्ये पु० स्त्री। स्त्रियाम् आजवस्तेयी। यस्कादिपाठात् बहुषु लुकि। अजवस्तयः तदपत्येषु।

**अजवाह** पु० अजं वाहयति यत्र आधारे घञ् ६त०। देशभेदे। कच्छादि० भवाद्यर्थे अण्। आजवाहः तद्देशजातादौ त्रि०।

**अजवीथी** स्त्री अजेन ब्रह्मणा निर्म्मिता वीथी पदं शा०त०। गगनसेतुरूपे (यमनाला) इति ख्याते छायापथे। याम्यारभ्य अगस्त्यस्थानपर्य्यन्तं पितृयानपथः। "पितृयानोऽजवीथ्याश्च यदगस्त्यस्य चान्तरमिति" पुरा०।

**अजशृङ्गी** स्त्री अजस्य मेषस्य शृङ्गमिव फलमस्याः ब०। (गाड़लशिङ्गा) इति प्रसिद्धे मेषशृङ्गतुल्यफलवत्यां मेषशृङ्ग्याम्।

**अजस्तुन्द** न० अजस्य तुन्दमिव तुन्दमस्मिन् तन्नगरवासिनामित्यर्थात् सुट्। नगरभेदे। "अजस्तुन्दं नाम नगरमिति" सि०कौ०।

**अजस्र** न० न+जस र। सन्तते विच्छेदरहिते। तथाभूतकालस्थायिनि वस्तुमात्रे त्रि०। "अजस्रमास्फालितवल्लकीगुणेति" माघः "अजस्रदीक्षाप्रयतस्य मद्गुरोरिति" रघुः।

**अजहत्स्वार्था** स्त्री न जहत् स्वार्थो याम् हा-शतृ न०ब०। स्वार्थापरित्यागेन परार्थविबोधिकायां लक्षणायाम्। यथा श्वेतो धावतीत्यादौ श्वेतगुणापरित्यागेन तद्वति लक्षणा। "जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा" इति हरिः।

**अजहल्लिङ्ग** पु० न जहत् लिङ्गं यम् हा-शतृ न०ब०। नियतलिङ्गके विशेष्यस्यान्यलिङ्गकत्वेऽपि स्वलिङ्गात्यागेन स्वलिङ्गपरे विशेषणशब्दे। तथा चान्यत्र विशेषणस्य विशेष्यानुसारिलिङ्गत्वनियमेऽपि अस्य न तथा नियमः। यथा वेदः श्रुतिर्वा प्रमाणम्। [कुशीति) ख्याते वृक्षे।

**अजहा** स्त्री न जहाति शूकान्। हा-श न०त०। (आल्

**अजागर** पु० जागरयति जागरः न जागरो यस्मात् ५ब०। सेवनेन निद्राराहित्यकारके "यदपेक्षयाऽन्यस्मिन् जागरणकर्त्तृत्वं नास्ति" तादृशे (भीमराज) इति ख्याते भृङ्गराजे। "भृङ्गराजः सुजागर" इति रभसवाक्यात् तस्यात्यन्तनिद्राराहित्यकारित्वम्।

**अजाजि(जी)** स्त्री अजेन छागेन वीयते गन्धोत्कटत्वात् त्यज्यते अज-इन् वीभावाभावः ३त०। सर्वभक्षेणापि छागेन गन्धोत्कटतया त्यज्यमाने, (जीरा) इति प्रसिद्धे जीरके वृक्षे। काकोदुम्बरिकावृक्षे च (पेयारा)॥

**अजाजीव** पु० अजेन तद्रक्षणपोषणादिना तत्क्रयविक्रयादिना वा आजीवति आ+जीव-अच् ३त०। छागपालके तत्क्रयविक्रयाभ्यामाजीविनि च।

**अजातककुद्** पु० न जातं ककुदमंसकूटं यस्य न-ब० ककुदशब्दस्यान्त्याकारलोपः। अपूर्णककुदि अल्पवयस्के गवादिवत्से।